http://www.sgbauonline.com/



# M.A. (Part-I) Sanskrit (Semester-I) Examination

## SANSKRIT

## Paper—4

## (Literature & Aesthetics)

Time : Three Hours] [Maximum Marks : 80

**सूचना :—** निर्देशाभावे उत्तराणि स्वीकृतभाषयैव लिखतु।

**(ऊरुभङ्गम्)**

1. (अ) श्लोकद्वयोः अनुवादं कुरुत : 10

(1) भीष्मद्रोणतटां जयद्रथजलां गान्धारराजह्रदां
कर्णद्रोणिकृपोर्मिनक्रमकरां दुर्योधनस्रोतसम्।
तीर्णः शत्रुनदीं शरासिसिकतां येन प्लवेनार्जुनः
शत्रूणां तरणेषु वः स भगवानस्तु प्लवः केशवः।।

(2) एषा निरस्तहयनागनरेन्द्रयोधा
व्यक्तीकृता दिनकरोग्रकरैः समन्तात्।
नाराचकुन्तशरतोमरखड्गकीर्णा
तारागणं पतितमुद्वहतीव भूमिः।।

(3) श्रीमान् संयुगचन्दनेन रुधिरेणाद्रौनुलिप्तच्छवि-
र्भूसंसर्पणरेणुपाटलभुजो बालव्रतं ग्राहितः।
निवृत्तेऽमृतमन्थने क्षितिधरान्मुक्तः सुरः सासुरै-
राकर्षन्निव भोगमर्णवजले श्रान्तोज्झितो वासुकिः।।

(4) भिन्ना मे भ्रुकुटी गदानिपतैर्व्यायुद्धकालोत्थितै-
र्वक्षस्युत्पतितै प्रहाररुधिरैर्हारावकाशो हृतः।
पश्येमौ व्रणकाञ्चनाङ्गदधरौ पर्याप्तिशोभौ भुजौ
भर्ता ते न पराङ्मुखो युधिहतः किं क्षत्रिये रोदिषि।।

(ब) 'राजा-गान्धारी' मध्ये कः संवादः जातः ? 6

**अथवा**

ऊरुभङ्ग नाटकस्य सारांशः लिखतु।

**(रघुवंशम्)**

2. (अ) श्लोकद्वयोः अनुवादं कुरुत : 10

(1) स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमानबन्धधीरः।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरज्वगच्छत्।।



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(2) शशाम वृष्ट्यापि विना दवाग्निरासीद् विशेषा फलपुष्पवृद्धिः।
ऊनं न सत्वेष्वधिको बबाधे तस्मिन् वनं गोप्तरि गाहमाने।।

(3) ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः।
जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत् प्रसभोद्धृतारिः।।

(4) अलं महीपाल ! तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात्।
न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्च्छति मारुतस्य।।

(ब) नन्दिन्या राजा कथं परीक्षितम्। 6

अथवा

सिंहराजानौ संवादः लिखतु।

3. (अ) श्लोकद्वयोः अनुवादं कुरत 10

(1) कण्डूयमानेन कटं कदाचिद् वन्यद्विपेनोन्माथिता त्वगस्य।
अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः।।

(2) स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद।
दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः।।

(3) तस्मिन् क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम्।
अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता।।

(4) पुरन्दरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनन्द्यमानः।
भुजे भुजङ्गेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज।।

(ब) कस्य एकस्योपरि टिप्पणीं लिखतु : 6

(1) कामधेनुदुहिता नन्दिनी।

अथवा

(2) राजा दिलीपः।

(ध्वन्यालोकः)

4. (अ) द्वयोः ससंदर्भानुवादं कुरत : 10

(1) प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।।

(2) शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते।
वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम्।।

(3) स्वसामर्थ्यवशेनैव वाक्यार्थं प्रतिपादयन्।
यथा व्यापारनिष्पत्तौ पदार्थो न विभाव्यते।।

(4) भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः।
अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया।।

(ब) एकस्योपरि टिप्पणी लिखतु : 6

(1) अभिहितान्वय-वादः

(2) अविवक्षितवाच्य ध्वनिः



http://www.sgbauonline.com/

http://www.sgbauonline.com/

5. योग्य उत्तरम् चिनुत (केऽपि षोडश) : 16

(1) क्षेमेन्द्रानुसारेण रससंपृक्तस्य काव्यस्य कः प्राणः ?

(i) अनौचित्यम् (ii) अलङ्कारः

(iii) रसः (iv) औचित्यम्

(2) क्षेमेन्द्रेण काव्यतत्त्वस्य स्वरूपे कं तत्त्वं सर्वोच्चस्थाने स्थापितम् ?

(i) रीतितत्त्वम् (ii) रसतत्त्वम्

(iii) अनौचित्यतत्त्वम् (iv) औचित्यतत्त्वम्

(3) कालिदासस्य 'जातं वंशे भुवन विदिते......' श्लोके औचित्यस्य कः प्रकारः ?

(i) प्रबन्धार्थगतौचित्यम् (ii) विशेषणौचित्यं

(iii) निपातौचित्यम् (iv) अलङ्कारौचित्यम्

(4) अनौचित्यं कस्य कारणं भवति ?

(i) रसनिष्पत्तेः (ii) अलङ्कारस्य

(iii) अर्थभङ्गस्य (iv) रसभङ्गस्य

(5) औचित्यतत्त्वस्य नामोल्लेखपूर्वकं प्रथमं निर्देशं केन कृतम् ?

(i) व्यासेन (ii) भरतेन

(iii) भामहेन (iv) रुद्रटेन

(6) स्वभावानुरूपंवर्णनं काव्यस्य कीदृशम् आभूषणम् ?

(i) अयोग्यम् (ii) कृत्रिमम्

(iii) अकृत्रिमम् (iv) सामान्यम्

(7) पदार्थद्वारेण किं सम्प्रतीयते ?

(i) शब्दार्थः (ii) काव्यार्थः

(iii) समासार्थः (iv) वाक्यार्थः

(8) अभावस्य कति विकल्पाः सन्ति ?

(i) 3 (ii) 5

(iii) 8 (iv) 9

(9) रीति सम्प्रदायस्य कः प्रवर्तकः ?

(i) क्षेमेन्द्रः (ii) वामनः

(iii) मम्मटः (iv) अभिनवगुप्तः

(10) माधुर्यसौकुमार्योपपन्ना का रीतिः ?

(i) पाञ्चाली (ii) गौडी

(iii) वैदर्भी (iv) न काऽपि



http://www.sgbauonline.com/

http://www.sgbauonline.com/

(11) वैदर्भी किमर्थं ग्राह्या ?

(i) गुणाभावात्
(ii) दोषाभावात्
(iii) गुणसाकल्यात्
(iv) समासबाहुल्यात्

(12) रित्या कति प्रकारा: ?

(i) द्विविधा
(ii) चतुर्विधा
(iii) पञ्चविधा
(iv) त्रेधा

(13) ध्वन्यालोकस्य क: रचनाकार: ?

(i) मम्मट:
(ii) अभिनवगुप्त:
(iii) आनन्दवर्धनाचार्य:
(iv) वामन

(14) अविवक्षित वाच्यध्वने: कति भेदा: ?

(i) भेदद्वय:
(ii) भेदत्रय:
(iii) भेदाष्ट
(iv) भेदपञ्च

(15) 'भक्ति:' इति कस्या: अपर नाम ?

(i) व्यङ्ग्यस्य
(ii) वाच्यस्य
(iii) लक्षणाया:
(iv) शब्दार्थस्य

(16) रीति: काव्यस्यात्मा इति केन कथितम् ?

(i) वामनेन
(ii) भरतेन
(iii) मम्मटेन
(iv) क्षेमेन्द्रेण

(17) वैदर्भी किमर्थम् ग्राह्या ?

(i) अर्थाभावे
(ii) औचित्याभावे
(iii) समासाभावे
(iv) अलङ्काराभावे

(18) ध्वनिविरोधक: क: कवि: अस्ति ?

(i) मनोरथकवि:
(ii) कालिदास:
(iii) माघ:
(iv) बाणभट्ट:

(19) ध्वने: कति रूपाणि सन्ति ? (ध्वन्यालोकानुसारेण)

(i) 5
(ii) 3
(iii) 4
(iv) 6

(20) रसप्रतीति: कीदृशी अस्ति ?

(i) लौकिका
(ii) अलौकिका
(iii) सामान्या
(iv) विशेषा



http://www.sgbauonline.com/